# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## मध्यावधिः–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा- नवमी– संस्कृतम्

**समयः होरात्रयम्** **सम्पूर्णाङ्काः- 80**

**सामान्यनिर्देशाः –**

उत्तरलेखनात्पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

### अपठितावबोधनम्

**1 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **10**

प्राचीनकाले प्रसिद्धो मगधो नाम जनपदो अभवत्। अस्मिन् राज्ये सदानीरा गङ्गा नदी प्रवहति स्म। पाटलिपुत्रम् अस्य राज्यस्य राजधानी आसीत्। पाटलिपुत्रे एकं प्रसिद्धं स्थलं मिथिलानामकं प्रदेशं आसीत्। मिथिलाप्रदेशे मातुः सीतायाः जन्म अभूत्। तस्याः चरित्रं निर्मलं पावनम् आसीत्। भगवता श्रीरामेण सह तस्याः विवाहः सम्पन्नो बभूव। मातुः कैकय्याः आज्ञां शिरोधार्यं कृत्वा भगवान् श्रीरामः वनं प्रति गतवान्। वने लङ्कापतिः रावणः मातरं सीतां छलेन चोरयित्वा लङ्कानगरीं नीतवान्। भगवान् श्रीरामः रावणं हत्वा मातरं सीतां नीत्वा अयोध्यां प्राप्तवान्।

**(अ) एकपदेन लिखत– (केवलं प्रश्नद्वयम्)**

i. प्राचीनकाले किं नाम प्रसिद्धो जनपदो अभवत्? **2x1=2**
ii. मिथिलाप्रदेशे कस्याः जन्म अभूत्?
iii. एतस्याः विवाहः केन सह सम्पन्नो बभूव?

**2x2=4**

**(आ) पूर्णवाक्येन लिखत– (केवलं प्रश्नद्वयम्)**

i. मातुः कैकय्याः आज्ञां शिरोधार्यं कृत्वा कः वनं प्रति गतवान्?
ii. वने कः मातरं सीतां छलेन चोरयित्वा लङ्कानगरीं नीतवान्?
iii. श्रीरामः कं हत्वा मातरं सीताम् नीत्वा अयोध्यां प्राप्तवान्?

**(इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं संस्कृतेन लिखत–** **1x1=1**

**(ई) यथानिर्देशम् उत्तरत–** **3x1=3**

i. 'प्रख्यातं' पदस्य किं समानार्थकं पदं गद्यांशे प्रयुक्तम्?
ii. 'नीतवान्' क्रियायाः कर्तृपदं गद्यांशात् चित्वा लिखत।
iii. 'आधुनिककाले' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

**रचनात्मकं कार्यम्** **15 अङ्काः**

**2 अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत-** **5**

भवान् दीपकः। भवतः विद्यालये फ्लुटीकाकरणस्य शिविरस्य आयोजनम् अभवत्, इति सूचयन्तं मञ्जूषायां दत्तानां पदानां सहायतया पितरं प्रति पत्रं लिखतु।

**मञ्जूषा**

| |
|---|
| बालकानां, दीपकः, फ्लुटीकाकरणस्य, तत्रास्तु, महत्वं, प्रणमामि, संयोजिका, छात्राः, निवेदनीयाः, दृष्ट्वा, उत्तमस्वास्थ्याय, पञ्चदश आयुवर्गात्, विद्यालये, प्राध्यापिका, विद्यालये, एकोनविंशतिः |

**अथवा**

भवान् महेशः अस्ति। भवान् रामपुरस्य संगमविहारे निवसति। भवतः क्षेत्रे चिरंकालात् अस्वच्छतायाः समस्या अस्ति, यया वर्षाकाले रोगप्रसाराणाम् आशङ्का अपि सम्भवति। एतदर्थं भवान् स्वनगर–निगमस्य अधिकारिणं प्रति पत्रं लिखति, एतत् पत्रं मञ्जूषायां दत्तानां पदानां सहायतया पूरयन्तु।

**मञ्जूषा**

| |
|---|
| शिक्षकाः, छात्राः, विद्यालयः, पठन्ति, डेंगू, चिकनकुनिया, मलेरिया, ज्वरः, ओषधिः, चिकित्सालये, चिकित्सकः, परिचर्या, सुरक्षा, संरक्षणं, उपायः, जलं, मशकाः, अवकरः, प्रभवन्ति |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-** **5x1=5**



**मञ्जूषा**

| |
|---|
| पश्यति, भवनम्, उत्पतन्ति, सरोवरे, उद्यानम्, वृक्षाः, नभसि, मत्स्याः, सन्ति, पुरतः, जनः, दूरवाणीं, सुखदा, निर्मला वायुः, रम्यं, दृश्यम्, विहगाः, जनः गृहं, सलग्नः, मार्गः |

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**पक्षिसभम्**

| |
|---|
| काकः, कृष्णवर्णः, अन्नं, मांसं च, शिशोः हस्तात्, रोटिका, आच्छिद्य, कपोतः, वसन्तसमये, नीडे, कोकिलः, शावकान्, उड्डीयते, चटका, भक्षयति, मयूरः, पिबति, आनयति, रवः, कटुः पिकः, परिश्रमी, प्रस्तरान्, जलं, घटः, स्थापयति, हंसः, शुकः, निवसति |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत।** **5x1=5**

i. वह मेरा घर है।
That is mine home.

ii. सीमा गाना गाती है।
Seema sing a song.

iii. मैंने पुस्तक पढी।
I red a book.

iv. बीना कल घर जायेगी।

Beena will go to home yesterday.

v. संस्कृत सभी भाषाओं की जननी है

Sanskrit is mother of all language.

**'ग'-खण्डः**

**अनुप्रयुक्त-व्याकरणम्**

**5.** अ **अधोलिखितेषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा लिखत** **4x1=4**

I. **तवाकर्ण्य** वीणामदीनां नदीनाम्।

II. **नैतादृशः** स्वर्णपक्षो रजतचञ्चुः स्वर्णकाकस्तया पूर्वं दृष्टः।

III. **सूर्य+उदयात्** पूर्वमेव सा तत्रोपस्थिता।

IV. पादप्रहारेण चन्दनं रक्तरञ्जितं करोति हा! **हतः+अस्मि।**

अथवा

आ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत**

i.) एका विनम्रा मनोहरा दुहिता **चासीत्।**

ii.) **वृक्षस्य+ उपरि** विलोक्य सा च आश्चर्यचकिता सञ्जाता।

iii.) मासानन्तरम् अस्मद् गृहे **महोत्सवः** भविष्यति।

iv.) **पञ्चाशत्+उत्तरैकशतं** रूप्यकाणि च देहि।

**6. प्रदत्तविकल्पेभ्यः उचितशब्दरूपाणि चित्वा रिक्तस्थानानि पूरयत–** **4x1=4**

**i.)** सुरेशः......................पठति।

(क) पुस्तकस्य (ख) पुस्तकाय (ग) पुस्तकं (घ) पुस्तकात्

**(ii)** मोहनः मम मित्रस्य ......................अस्ति।

(क) पुत्रं (ख) पुत्रः (ग) पुत्रेण (घ) पुत्राय

**(iii)** वने एकः भयंकरः ...................... निवसति स्म।

(क) व्याघ्रः (ख) व्याघ्रं (ग) व्याघ्रेण (घ) व्याघ्राय

**(iv)** प्रतीकः मम ......................पठति।

(क) विद्यालयस्य (ख) विद्यालात् (ग) विद्यालयाय (घ) विद्यालये

**7. उचितलकारं प्रयुज्य क्रियापदैः वाक्यानि पूरयत -** **4x1=4**

**(i)** माता व्यञ्जनं ......................।

(क) पचसि (ख) पचन्ति (ग) पचति (घ) पचामः

**(ii)** मम अध्यापिका विदुषी ......................।

(क) अस्मि (ख) अस्ति (ग) स्तः (घ) सन्ति

**(iii)** तानि फलानि मधुराणि **……………………।**

(क) सन्ति (ख) अस्ति (ग) आसीत् (घ) स्तः

**(iv)** रमेशः सुरेशं भोजनाय …………………… ।

(क) आमन्त्रयन्ति (ख) आमन्त्रयति (ग) आमन्त्रयतः (घ) आमन्त्रयसि

**8. कारक–उपपदविभक्तिम् आश्रित्य विकल्पेभ्यः उचितपदानि चिनुत। 4x1=4**

(i) घनश्यामः …………………… वेदमन्त्रं पठति।

(क)मुखम् (ख) मुखेन (ग) मुखाय (घ) मुखे

(ii) रोहितः …………………… धनं ददाति।

(क) निर्धनं (ख) निर्धनेभ्यः (ग) निर्धने (घ) निर्धनानाम्

(iii) मन्दिरं निकषा मम ……………………अस्ति।

(क) गृहात् (ख) गृहाय (ग) गृहेभ्यः (घ) गृहम्

(iv) छात्राः ……………… गृहम् आगच्छन्ति।

(क) विद्यालयं (ख) विद्यालयात् (ग) विद्यालयेन (घ) विद्यालयस्य

**9. रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा विकल्पेभ्यः समुचितं उत्तरं लिखत - 3x1=3**

(i) मूल्यं तु दुग्धं **विक्री+ल्यप्** एव दातुं शक्यते।

**(**क**)** विक्रीय **(**ख**)** विक्रील्य (ग) विक्रीत्य (घ) विक्रेय

**(ii)** स विद्याव्यसनी **भूत्वा** महान्तं वैदुष्यं लेभे।

(क) भू+ल्यप् (ख) भू+क्त (ग) भू+त्वा (घ) भू+क्त्वा

**(iii)** स तु मां नेतुं विगते श्रावणे आगतः आसीत्।

(क) ने+तुमुन् (ख) नी+तुमुन् (ग) ने+तुम् (घ) नी+तुम्

**10. अङ्कानां स्थाने उचितसंख्यापदानि संस्कृतभाषया लिखत – 4x½=2**

**(i)** उद्याने **(87)** आम्रवृक्षाः सन्ति।

**(ii)** विद्यालये **(16)** शिक्षकाः सन्ति।

**(iii)** मम कक्षायां **(34)** छात्राः सन्ति।

**(iv)** पुस्तकालये सम्प्रति **(48)** छात्राः अध्ययनरताः सन्ति।

**11. अधोलिखितपदेषु उपसर्गं संयोज्य विभज्य वा लिखत-** **4x½=2**

**(i)** पराजितः ……………..+……………….

**(ii)** अनु-ईक्षणम् ……………..……………….

**(iii)** सञ्जाता ……………..+……………….

**(iv)** सम्+उत्+डीयते ……………..……………….

**12. कोष्ठकेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत-** **2x1=2**

(i) ....... अवकाशः भविष्यति।

(ii) त्वम् ........ पठिष्यति?

**मञ्जूषा**

| |
|---|
| श्वः, कदा |

## पठितावबोधनम्

13 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

चिरकालं भवने चित्रविचित्रवस्तूनि सज्जितानि दृष्ट्वा सा विस्मयं गता। श्रान्तां तां विलोक्य काकः प्राह– पूर्वं लघुप्रातराशः क्रियताम्। वद त्वं स्वर्णस्थाल्यां भोजनं करिष्यसि किं वा रजतस्थाल्यामुत ताम्रस्थाल्याम्? बालिका व्याजहार– ताम्रस्थायामेवाहं निर्धना भोजनं करिष्यामि। तदा सा कन्या चाश्चर्यचकिता सञ्जाता यदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्। नैतादृक् स्वादु भोजनमद्यावधि बालिका खादितवती । काको ब्रूते– बालिके! अहमिच्छामि यत्त्वं सर्वदा चात्रैव तिष्ठ परं तव माता वर्तते चैकाकिनी। त्वं शीघ्रमेव स्वगृहं गच्छ।

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**

(i) स्वर्णकाकेन बालिकायै कस्यां भोजनं परिवेषितम्?

(ii) भवने सज्जितानि कानि दृष्ट्वा बालिका विस्मयं गता?

(iii) 'ताम्रस्थाल्याम् एव अहं भोजनं करिष्यामि' इति का व्याजहार? **2x½=1**

**ख. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) कन्या कदा आश्चर्यचकिता सञ्जाता?

(ii) श्रान्तां बालिका विलोक्य काकः किं प्राह?

(iii) भोजनानन्तरं काकः किं ब्रूते?

**ग. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

(i) 'अहम् इच्छामि' अत्र कर्तृपदं किम् अस्ति?

(ii) 'तव माता एकाकिनी' अत्र विशेषणपदं किम् अस्ति?

(iii) ' तव माता वर्तते चैकाकिनी। ' अत्र तव इति सर्वनामपदं कस्मै प्रयुक्तम्?

**14 अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥**

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

(i) काः अम्भः स्वयं न पिबन्ति?

(ii) केषां विभूतयः परोपकाराय भवन्ति?

(iii) वृक्षाः स्वयं कानि न खादन्ति?

**ख. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i. के सस्यं न खादन्ति?

ii. नद्यः किं न कुर्वन्ति?

iii. सतां विभूतयः किमर्थ भवन्ति?

**ग. यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i. 'मेघा' इत्यस्य कृते पद्यांशे कि पर्यायपदं प्रयुक्तम्?

ii. पद्ये 'अदन्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति

iii. 'जलम्' इत्यस्य कृते पद्यांशे किं पर्यायपदं प्रयुक्तम् ?

**प्र.15 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

(मासानन्तरं सन्ध्याकालः। एकत्र रिक्ताः नूतनघटाः सन्ति। दुग्धक्रेतारः अन्ये च ग्रामवासिनः अपरत्र आसीना:)

**चन्दनः**- (धेनुं प्रणम्य, मङ्गलाचरणं विधाय, मल्लिकाम् आह्वयति) मल्लिके! सत्वरम् आगच्छ।

**मल्लिका**– आयामि नाथ! दोहनम् आरभस्व तावत्।

**चन्दनः**– (यदा धेनोः समीपं गत्वा दोग्धुम् इच्छति, तदा धेनुः पृष्ठपादेन प्रहरति, चन्दनश्च पात्रेण सह पतति) नन्दिनि! दुग्धं देहि। किं जातं ते? (पुनः प्रयासं करोति) हा! हतोऽस्मि (चीत्कारं कुर्वन् पतति)

(सर्वे आश्चर्येण चन्दनम् अन्योन्यं च पश्यन्ति)

**मल्लिका**– (चीत्कारं श्रुत्वा, झटिति प्रविश्य) नाथ! कि जातम् ? कथं त्वं रक्तरञ्जितः?

**क. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

i.) कः चीत्कारं कुर्वन् पतति?

ii.) ग्रामवासिनः कुत्र आसीनाः आसन्?

iii.) चन्दनः केन सह पतति?

**ख. पूर्णवाक्येन उत्तरत (केवल प्रश्नद्वयम्)** **2x1=2**

i.) चन्दनः यदा दोग्धुम् इच्छति तदा धेनुः किं करोति?

ii.) चन्दनस्य चीत्कारं श्रुत्वा मल्लिका कि कथयति ?

iii.) चन्दनः किं कृत्वा मल्लिकाम् आश्वयति?

**ग.यथानिर्देशम् उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

i.) 'रिक्ताः घटाः सन्ति' अत्र विशेष्यपदं किम् अस्ति?

ii.) 'सत्वरम् आगच्छ' अत्र क्रियापदं किम् अस्ति?

iii.) ' कथं त्वं रक्तरञ्जितः ' अत्र त्वम् इति सर्वनामपदं कस्मै प्रयुक्तम्?

**16. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **4x1=4**

i.) उपाध्यायस्य **मुखं** भूयः द्रक्ष्यामि।

ii.) **ग्रामे** एकाऽपरा लुब्धा वृद्धा न्यवसत्।

iii.) सूर्यातपे तण्डुलान् **खगेभ्यो** रक्ष।

iv.) तव **मातुलानि** तु गङ्गास्नानार्थ काशीं गता।

**17. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखित–श्लोकस्य अन्वयं पूरयत–** **3**

**वहति मन्दं मन्दं सनीरे समीरे, कलिन्दात्मजायास्सवानीरतीरे।**
**नतां पङ्क्तिमालोक्य मधुमाधवीनाम्, निनादय नवीनामये वाणि! वीणाम्।।**

**अन्वयः**– कलिन्दात्मजायाः सवानीरतीरे समीरे (i) ...................... मन्दमन्दं वहति (सति) (ii) ...................... नतां पक्ङितम् आलोक्य हे वाणि! (iii)...................... वीणां निनादय ।

**मञ्जूषा**

| |
|---|
| मधुमाधवीनां, नवीनां, सनीरे, |

**अथवा**

**श्लोकस्य भावार्थं मञ्जूषापदसहायतया पूरयित्वा लिखत -**

**गुणा गुणज्ञेषु गुणा भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः।**
**आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥**

**भावार्थः-** गुणाः गुणिजनेषु सद्गुणाः (i) ……………….. परन्तु ते एव गुणाः निर्गुणं जनं प्राप्य दोषाः भवन्ति। यथा नदीनां जलं यावत्पर्यन्तं नदीषु भवति तावत्पर्यन्तं तद् जलं (ii) ……………….भवति, परन्तु तदेव(iii). ……………….. यदा समुद्रम् प्राप्नोति तदा तद् जलं पातुं योग्यं न भवति।

**मञ्जूषा**

| |
|---|
| भवन्ति, जलं, सुस्वादु |

**18. अधोलिखित- कथांशं यथाक्रमं लिखतु।** **8x½=4**

(i) तं निवारयन्ती सा प्रार्थयत् तण्डुलान् मा भक्षय।

(ii) पुरा कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्।

(iii) मञ्जूषायां महार्हाणि हीरकाणि विलोक्य बालिका प्रहर्षिता सञ्जाता।

(iv) अहं तुभ्यं तण्डुलमूल्यं दास्यामि।

(v) काकः तां प्रत्यवदत् - "बालिके! यथेच्छं गृहाण मञ्जूषामेकाम्"।

(vi) एको विचित्रः काकः समुड्डीय तामुपजगाम ।

(vii) स्वर्णसोपानेन सा स्वर्णभवनम् आससाद।

(viii) तदा स्वर्णकाकेन स्वर्णस्थाल्यां भोजनं परिवेषितम्।

**प्र.19 (क) अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -** **4x½=2**

**(1)** स्वनन्तीं ततिं **प्रेक्ष्य** मलिनामलीनाम्।

(क) दृष्ट्वा (ख) क्षिप्त्वा (ग) नत्वा (घ) ज्ञात्वा

(ii) "बालिके! यथेच्छं गृहाण **मञ्जूषाम्** एकाम्"।

(क) पेटिकाम् (ख) जलवाहिनीम् (ग) पुत्रीम् (घ) धनम्

(iii) वृत्तं यत्नेन संरक्षेद् **वित्तम्** एति च याति च।

(क) चरित्रम् (ख) मित्रम् (ग) धनम् (घ) जीवनम्

(iv) येषां **मरालैः** सह विप्रयोगः।

(क) काकैः (ख) मयूरैः (ग) हंसैः (घ) शुकैः

**(ख) अधोलिखितशब्दानां तेषाम् अर्थैः सह मेलनं कुरुत** **4x½=2**

| **(क)** | **(ख)** |
|---|---|
| (i)पक्षिणः | (क) सज्जनानाम् |
| (ii) वारिवाहा: | (ख) खगाः |
| (iii) सताम् | (ग) मम |
| (iv) मदीय | (घ) मेघाः |

…………..0…………….